# Shri Padmavatistotram 3

# શ્રીપદ્માવતીસ્તોત્રમ્ ૩

## Document Information

Text title : padmAvatIstotram 3

File name : padmAvatIstotram3.itx

Category : devii, devI, jaina

Location : doc_devii

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીપદ્માવતીસ્તોત્રમ્ ૩

જય જય જગદાનન્દદાયિનિ ! જય જય ધરણેન્દ્રવલભે ! સુભગે !
દેવિ ! ફણત્રયધારિણિ ! ત્વં જય પદ્માનને ! પદ્મે ! ॥ ૧॥

વિજયા જયાઽજિતા ત્વં અપરાજિતા શિવા ગૌરી ।
રમ્ભા ત્વં વૈરોટ્યા પ્રજ્ઞપ્તિર્ભદ્રકાલી ચ ॥ ૨॥

કાલી ચ મહાકાલી શિવઙ્કરી શઙ્કરી પદ્મનેત્રા ।
હિમવત્તનયા લક્ષ્મીર્ધૃતિમતિભુવનેશ્વરી દેવી ॥ ૩॥

ત્વં વુદ્ધિ-સિદ્ધિ-વૃદ્ધિસ્ત્વં જ્વાલામાલિનીશ્વરી બાલા ।
કામાક્ષા જગદમ્બા અમ્બા જગદીશ્વરી તારા ॥ ૪॥

ત્વમમ્વિકાઽન્નપૂર્ણા શ્રીર્વિદ્યાત્રિપુરન્દરીજનની ।
ત્વં ભગવતી ભવાની માતઙ્ગી રાજમાતઙ્ગી ॥ ૫॥

ત્વં ભૈરવી ત્રિનેત્રી શક્તિસ્ત્વં હિઙ્ગુલાજ-હીઙ્ગોલી ।
ત્વં વાગ્વાદિનીશારદા સરસ્વતી સત્યદેવી ચ ॥ ૬॥

જ્વાલામુખિ ભો બાલા પીઠા શાકમ્ભરી ચ ત્યમનન્તા ।
શીતલા તોતલા ભદ્રા વજ્રા કૂષ્માણ્ડી ચક્રધરા ॥ ૭॥

ચામુણ્ડી મહામાયા ગાયત્રી સર્વવિશ્વવિખ્યાતા ।
શ્રુતદેવી જિનવાણી ત્વં વિદ્યા વર્દ્ધમાનસ્ય ॥ ૮॥

નાગકુમારકુમારી દેવી કાત્યાયની મધુમતી ચ ।
કુણ્ડલિની હ્રીઙ્કારી આઈ માઈ ચ દુર્ગામા ॥ ૯॥

ભોગી ચાનન્દકરી ત્વં વરદાનન્દદાયિની નિત્યા ।
બ્રહ્માણી બાહુવલી સિંહમરાલે સમારૂઢા ॥ ૧૦॥

ત્વં ચૈકાક્ષરનામા અક્ષરી ત્ર્યક્ષરી ષડક્ષરી માતા ।
પઞ્ચદશાક્ષરગર્ભિતા ત્વં ભુવનત્રયસ્ય સૌખ્યકરી ॥ ૧૧॥

ત્રિજગન્નામશરીરા જનજાડ્યવિભઞ્જના રવિકરાભા ।
સેવકવાઞ્છિતફલદા પદ્મદલા ભાસ્વરી સેવ્યા ॥ ૧૨॥

શ્રીપાર્શ્વનાથપદપઙ્કજભક્તિલીના પદ્માસના પ્રવરકુર્કુટસર્પયાના ।
દારિદ્ર્યદુઃખરિપુવર્ગવિનાશનોત્કા પદ્માવતી ભવતુ મે ખલુ સા પ્રસન્ના ॥ ૧૩॥

ઇતિ શ્રીપદ્માવતીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by DPD

*Shri Padmavatistotram 3*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*